दैवीम् = दैवी
संपदम् = संपदाको
अभिजातस्य = प्राप्त हुए पुरुषके लक्षण
भवन्ति = हैं

* श्रेष्ठ पुरुषोंकी उस शक्तिका नाम तेज है कि जिसके प्रभावसे उनके सामने विषयासक्त और नीच प्रकृतिवाले मनुष्य भी प्रायः अन्यायाचरणसे रुककर उनके कथनानुसार श्रेष्ठ कर्मोंमें प्रवृत्त हो जाते हैं।

† गीता अध्याय १३ श्लोक ७ की टिप्पणी देखनी चाहिये।

संक्षेपसे आसुरी संपदाका कथन।

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥४॥

दम्भः, दर्पः, अभिमानः, च, क्रोधः, पारुष्यम्, एव, च,
अज्ञानम्, च, अभिजातस्य, पार्थ, संपदम्, आसुरीम् ॥४॥

और–

पार्थ = हे पार्थ
दम्भः = पाखण्ड
दर्पः = घमण्ड
च = और
अभिमानः = अभिमान
च = तथा
क्रोधः = क्रोध
च = और
पारुष्यम् = कठोर वाणी (एवं)
अज्ञानम् = अज्ञान
एव = भी (यह सब)
आसुरीम् = आसुरी
संपदम् = संपदाको
अभिजातस्य = प्राप्त हुए पुरुषके (लक्षण हैं)

दैवी और आसुरी संपदाका फल।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥५॥

दैवी, संपत्, विमोक्षाय, निबन्धाय, आसुरी, मता,
मा, शुचः, संपदम्, दैवीम्, अभिजातः, असि, पाण्डव ॥५॥

उन दोनों प्रकारकी संपदाओंमें–

दैवी संपत् = दैवी संपदा (तो)
विमोक्षाय = मुक्तिके लिये (और)
आसुरी = आसुरी (संपदा)
निबन्धाय = बांधनेके लिये
मता = मानी गई है
(अतः) = इसलिये
पाण्डव = हे अर्जुन (तूं)
मा शुचः = शोक मत कर
(यतः) = क्योंकि (तूं)
दैवीम् = दैवी
संपदम् = संपदाको
अभिजातः = प्राप्त हुआ
असि = है

विस्तारसे आसुरी स्वभाववाले पुरुषोंके लक्षण सुननेके लिये भगवान्की आज्ञा।

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥

द्वौ, भूतसर्गौ, लोके, अस्मिन्, दैवः, आसुरः, एव, च,
दैवः, विस्तरशः, प्रोक्तः, आसुरम्, पार्थ, मे, शृणु ॥६॥

और–

पार्थ	= हे अर्जुन	**दैवः**	= देवोंका स्वभाव
अस्मिन्	= इस	**एव**	= ही
लोके	= लोकमें	**विस्तरशः**	= विस्तारपूर्वक
भूतसर्गौ	= भूतोंके स्वभाव	**प्रोक्तः**	= कहा गया है
द्वौ	= दो प्रकारके	**(अतः)**	= इसलिये (अब)
(मतौ)	= माने गयेहैं (एक तो)	**आसुरम्**	= असुरोंके स्वभावको (भी) विस्तारपूर्वक
दैवः	= देवोंके जैसा	**मे**	= मेरेसे
च	= और (दूसरा)	**शृणु**	= सुन
आसुरः	= असुरोंके जैसा (उनमें)		

आसुरी संपदावालोंमें सदाचारके अभाव का कथन।

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥

प्रवृत्तिम्, च, निवृत्तिम्, च, जनाः, न, विदुः, आसुराः,
न, शौचम्, न, अपि, च, आचारः, न, सत्यम्, तेषु, विद्यते॥७॥

हे अर्जुन–

आसुराः	= आसुरी स्वभाववाले	**च**	= और
जनाः	= मनुष्य	**निवृत्तिम्**	= अकर्तव्य कार्यसे निवृत्त होनेको
प्रवृत्तिम्	= कर्तव्य कार्यमें प्रवृत्त होनेको	**च**	= भी

न	= नहीं	**न**	= न
विदुः	= जानते हैं (इसलिये)	**आचारः**	= श्रेष्ठ आचरण है
तेषु	= उनमें	**च**	= और
न	= न (तो)	**न**	= न
शौचम्	= बाहर भीतरकी शुद्धि है	**सत्यम्**	= सत्यभाषण
		अपि	= ही
		विद्यते	= है

आसुरी संपदा-वालों की नास्तिकता का कथन।

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम्॥८॥

असत्यम्, अप्रतिष्ठम्, ते, जगत्, आहुः, अनीश्वरम्,
अपरस्परसंभूतम्, किम्, अन्यत्, कामहैतुकम्॥८॥

तथा—

ते	= वे आसुरीप्रकृति-वाले मनुष्य	**अपरस्पर-संभूतम्**	= अपने आप स्त्री-पुरुषके संयोगसे उत्पन्न हुआ है
आहुः	= कहते हैं (कि)	**(अतः)**	= इसलिये
जगत्	= जगत्	**काम-हैतुकम्**	= केवल भोगोंको भोगनेके लिये
अप्रतिष्ठम्	= आश्रयरहित(और)	**(एव)**	= ही (है)
असत्यम्	= सर्वथा झूठा (एवं)	**अन्यत्**	= इसके सिवाय और
अनीश्वरम्	= बिना ईश्वरके	**किम्**	= क्या है

आसुरी प्रकृति-वालोंके दुराचार का वर्णन।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥९॥

एताम्, दृष्टिम्, अवष्टभ्य, नष्टात्मानः, अल्पबुद्धयः,
प्रभवन्ति, उग्रकर्माणः, क्षयाय, जगतः, अहिताः॥९॥

इस प्रकार—

एताम्	= इस	**अहिताः**	= सबका अपकार करनेवाले
दृष्टिम्	= मिथ्या ज्ञानको	**उग्र-कर्माणः**	= क्रूरकर्मी मनुष्य
अवष्टभ्य	= अवलम्बन करके		(केवल)
नष्टात्मानः	= नष्ट हो गया है स्वभाव जिनका (तथा)	**जगतः**	= जगत्‌का
अल्पबुद्धयः	= मन्द है बुद्धि जिनकी	**क्षयाय**	= नाश करनेके लिये ही
	(ऐसे वे)	**प्रभवन्ति**	= उत्पन्न होते हैं

[„] **काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।**
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः॥१०॥

कामम्, आश्रित्य, दुष्पूरम्, दम्भमानमदान्विताः,
मोहात्, गृहीत्वा, असद्ग्राहान्, प्रवर्तन्ते, अशुचिव्रताः ॥१०॥

और वे मनुष्य—

दम्भमान-मदान्विताः	= दम्भ मान और मदसे युक्त हुए	**अस-द्ग्राहान्**	= मिथ्या सिद्धान्तोंको
दुष्पूरम्	= किसी प्रकार भी न पूर्ण होनेवाली	**गृहीत्वा**	= ग्रहण करके
कामम्	= कामनाओंका	**अशुचि-व्रताः**	= भ्रष्ट आचरणोंसे युक्त हुए
आश्रित्य	= आसरा लेकर		
	(तथा)		(संसारमें)
मोहात्	= अज्ञानसे	**प्रवर्तन्ते**	= बर्तते हैं

[,,] चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

चिन्ताम्, अपरिमेयाम्, च, प्रलयान्ताम्, उपाश्रिताः,
कामोपभोगपरमाः, एतावत्, इति, निश्चिताः ॥११॥

तथा वे-

प्रलयान्ताम् = मरणपर्यन्त रहनेवाली
अपरिमेयाम् = अनन्त
चिन्ताम् = चिन्ताओंको
उपाश्रिताः = आश्रय किये हुए
च = और
कामोपभोगपरमाः = विषय भोगोंके भोगनेमें तत्पर हुए (एवं)
एतावत् = इतनामात्र ही आनन्द है
इति = ऐसे
निश्चिताः = माननेवाले हैं

[,,] आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥

आशापाशशतैः, बद्धाः, कामक्रोधपरायणाः,
ईहन्ते, कामभोगार्थम्, अन्यायेन, अर्थसञ्चयान् ॥१२॥

इसलिये-

आशापाशशतैः = आशारूप सैकड़ों फांसियोंसे
बद्धाः = बंधे हुए (और)
कामक्रोधपरायणाः = काम क्रोधके परायण हुए
कामभोगार्थम् = विषय भोगोंकी पूर्तिके लिये
अन्यायेन = अन्यायपूर्वक
अर्थसञ्चयान् = धनादिक बहुतसे पदार्थोंको (संग्रह करनेकी)
ईहन्ते = चेष्टा करते हैं

आसुरी प्रकृति-वालोंके ममता और अहंकार-युक्त अनेक मनोरथों का वर्णन।

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥

इदम्, अद्य:, मया, लब्धम्, इमम्, प्राप्स्ये, मनोरथम्,
इदम्, अस्ति, इदम्, अपि, मे, भविष्यति, पुनः, धनम् ॥१३॥

और उन पुरुषोंके विचार इस प्रकारके होते हैं कि–

मया	= मैंने	**मे**	= मेरे पास
अद्य	= आज	**इदम्**	= यह (इतना)
इदम्	= यह (तो)	**धनम्**	= धन
लब्धम्	= पाया है (और)	**अस्ति**	= है (और)
इमम्	= इस	**पुनः**	= फिर
मनोरथम्	= मनोरथको	**अपि**	= भी
प्राप्स्ये	= प्राप्त होऊंगा (तथा)	**इदम्**	= यह
		भविष्यति	= होवेगा

[„] **असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।**
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥

असौ, मया, हतः, शत्रुः, हनिष्ये, च, अपरान्, अपि,
ईश्वरः, अहम्, अहम्, भोगी, सिद्धः, अहम्, बलवान्, सुखी।१४।

तथा–

असौ	= वह	**हनिष्ये**	= मारूंगा (तथा)
शत्रुः	= शत्रु	**अहम्**	= मैं
मया	= मेरे द्वारा	**ईश्वरः**	= ईश्वर
हतः	= मारा गया (और)	**च**	= और
अपरान्	= दूसरे शत्रुओंको	**भोगी**	= ऐश्वर्यको भोगने-वाला हूं (और)
अपि	= भी		
अहम्	= मैं	**अहम्**	= मैं

सिद्धः	= सब सिद्धियोंसे युक्त (एवं)	बलवान्	= बलवान् (और)
		सुखी	= सुखी हूं

[„] **आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया**
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥

आढ्यः, अभिजनवान्, अस्मि, कः, अन्यः, अस्ति, सदृशः, मया, यक्ष्ये, दास्यामि, मोदिष्ये, इति, अज्ञानविमोहिताः ॥१५॥

तथा मैं—

आढ्यः	= बड़ा धनवान् (और)	अस्ति	= है (मैं)
अभिजनवान्	= बड़े कुटुम्बवाला	यक्ष्ये	= यज्ञ करूंगा
अस्मि	= हूं	दास्यामि	= दान देऊंगा
मया	= मेरे	मोदिष्ये	= हर्षको प्राप्त होऊंगा
सदृशः	= समान	इति	= इस प्रकारके
अन्यः	= दूसरा	अज्ञानविमोहिताः	= अज्ञानसे मोहित हैं
कः	= कौन		

आसुरी प्रकृतिवालोंको घोर नरककी प्राप्ति।

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥

अनेकचित्तविभ्रान्ताः, मोहजालसमावृताः, प्रसक्ताः, कामभोगेषु, पतन्ति, नरके, अशुचौ ॥१६॥

इसलिये वे—

अनेकचित्तविभ्रान्ताः	= अनेक प्रकारसे भ्रमित हुए चित्तवाले (अज्ञानीजन)	मोहजालसमावृताः	= मोहरूप जालमें फंसे हुए (एवं)

कामभोगेषु	= विषयभोगोंमें	**अशुचौ**	= महान् अपवित्र
प्रसक्ताः	= अत्यन्त आसक्त हुए	**नरके**	= नरकमें
		पतन्ति	= गिरते हैं

आसुरी प्रकृति वालोंके लक्षण।

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१७॥

आत्मसंभाविताः, स्तब्धाः, धनमानमदान्विताः,
यजन्ते, नामयज्ञैः, ते, दम्भेन, अविधिपूर्वकम् ॥१७॥

तथा–

ते	= वे	**अविधिपूर्वकम्**	= शास्त्रविधिसे रहित
आत्मसंभाविताः	= अपने आपको ही श्रेष्ठ माननेवाले	**नामयज्ञैः**	= केवल नाममात्रके यज्ञों-द्वारा
स्तब्धाः	= घमण्डी पुरुष		
धनमानमदान्विताः	= धन और मानके मदसे युक्त हुए	**दम्भेन**	= पाखण्डसे
		यजन्ते	= यजन करते हैं

[,,]

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥

अहंकारम्, बलम्, दर्पम्, कामम्, क्रोधम्, च, संश्रिताः,
माम्, आत्मपरदेहेषु, प्रद्विषन्तः, अभ्यसूयकाः ॥१८॥

तथा वे–

अहंकारम्	= अहंकार	**दर्पम्**	= घमण्ड
बलम्	= बल	**कामम्**	= कामना

च	= और	**आत्म-परदेहेषु**	= अपने और दूसरोंके शरीरमें (स्थित)
क्रोधम्	= क्रोधादिके	**माम्**	= मुझ अन्तर्यामीसे
संश्रिताः	= परायण हुए (एवं)	**प्रद्विषन्तः**	= द्वेष करनेवाले हैं
अभ्यसूयकाः	= दूसरोंकी निन्दा करनेवाले पुरुष		

द्वेष करनेवाले नराधमों को आसुरी योनिकी प्राप्ति ।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥

तान्, अहम्, द्विषतः, क्रूरान्, संसारेषु, नराधमान्,
क्षिपामि, अजस्रम्, अशुभान्, आसुरीषु, एव, योनिषु ॥१९॥

ऐसे—

तान्	= उन	**संसारेषु**	= संसारमें
द्विषतः	= द्वेष करनेवाले	**अजस्रम्**	= बारम्बार
अशुभान्	= पापाचारी (और)	**आसुरीषु**	= आसुरी
क्रूरान्	= क्रूरकर्मी	**योनिषु**	= योनियोंमें
नराधमान्	= नराधमोंको	**एव**	= ही
अहम्	= मैं	**क्षिपामि**	= गिराता हूं—

अर्थात् शूकर कूकर आदि नीच योनियोंमें ही उत्पन्न करता हूं ।

पुनः आसुरी स्वभाववालोंको अधोगति की प्राप्ति ।

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥

आसुरीम्, योनिम्, आपन्नाः, मूढाः, जन्मनि, जन्मनि,
माम्, अप्राप्य, एव, कौन्तेय, ततः, यान्ति, अधमाम्, गतिम्॥२०॥

इसलिये—

कौन्तेय	= हे अर्जुन	**मूढाः**	= वे मूढ़ पुरुष

जन्मनि	= जन्म	**ततः**	= उससे भी
जन्मनि	= जन्ममें	**अधमाम्**	= अति नीच
आसुरीम्	= आसुरी	**गतिम्**	= गतिको
योनिम्	= योनिको	**एव**	= ही
आपन्नाः	= प्राप्त हुए	**यान्ति**	= प्राप्त होते हैं अर्थात् घोर नरकोंमें पड़ते हैं
माम्	= मेरेको		
अप्राप्य	= न प्राप्त होकर		

काम, क्रोध और लोभरूप नरकके तीन द्वारोंका कथन।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

त्रिविधम्, नरकस्य, इदम्, द्वारम्, नाशनम्, आत्मनः,
कामः, क्रोधः, तथा, लोभः, तस्मात्, एतत्, त्रयम्, त्यजेत्॥२१॥

और हे अर्जुन–

कामः	= काम	**आत्मनः**	= आत्माका
क्रोधः	= क्रोध	**नाशनम्**	= नाश करनेवाले हैं अर्थात् अधोगतिमें ले जानेवाले हैं
तथा	= तथा		
लोभः	= लोभ		
इदम्	= यह	**तस्मात्**	= इससे
त्रिविधम्	= तीन प्रकारके	**एतत्**	= इन
नरकस्य	= नरकके	**त्रयम्**	= तीनोंको
द्वारम्	= द्वार*	**त्यजेत्**	= त्याग देना चाहिये

श्रेयसाधनसे परमगति की प्राप्ति।

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥

---

* सर्व अनर्थोंके मूल और नरककी प्राप्तिमें हेतु होनेसे यहां काम, क्रोध और लोभको नरकका द्वार कहा है।

एतैः, विमुक्तः, कौन्तेय, तमोद्वारैः, त्रिभिः, नरः,
आचरति, आत्मनः, श्रेयः, ततः, याति, पराम्, गतिम्॥२२॥

क्योंकि-

कौन्तेय	=हे अर्जुन	**आचरति**	=आचरण करता है†
एतैः	=इन	**ततः**	=इससे (वह)
त्रिभिः	=तीनों	**पराम्**	=परम
तमोद्वारैः	=नरकके द्वारोंसे	**गतिम्**	=गतिको
विमुक्तः	=मुक्त हुआ*	**याति**	=जाता है अर्थात् मेरेको प्राप्त होता है
नरः	=पुरुष		
आत्मनः	=अपने		
श्रेयः	=कल्याणका		

शास्त्रविधिको त्यागकर इच्छानुकूल वर्तनेवालोंकी निन्दा

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥२३॥

यः, शास्त्रविधिम्, उत्सृज्य, वर्तते, कामकारतः,
न, सः, सिद्धिम्, अवाप्नोति, न, सुखम्, न, पराम्, गतिम्॥२३॥

और-

यः	=जो पुरुष	**वर्तते**	=बर्तता है
शास्त्रविधिम्	=शास्त्रकी विधिको	**सः**	=वह
उत्सृज्य	=त्यागकर	**न**	=न (तो)
कामकारतः	=अपनी इच्छासे	**सिद्धिम्**	=सिद्धिको
		अवाप्नोति	=प्राप्त होता है

* अर्थात् काम, क्रोध और लोभ आदि विकारोंसे छूटा हुआ ।

† अपने उद्धारके लिये भगवत्-आज्ञानुसार बर्तना ही अपने कल्याणका आचरण करना है ।

(और)	न = न
न = न	सुखम् = सुखको (ही)
पराम् = परम	(प्राप्त होता है)
गतिम् = गतिको (तथा)	

शास्त्रके अनुकूल कर्म करनेके लिये प्रेरणा।

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥

तस्मात्, शास्त्रम्, प्रमाणम्, ते, कार्याकार्यव्यवस्थितौ,
ज्ञात्वा, शास्त्रविधानोक्तम्, कर्म, कर्तुम्, इह, अर्हसि ॥२४॥

तस्मात् = इससे	(एवम्) = ऐसा
ते = तेरे लिये	ज्ञात्वा = जानकर (तूं)
इह = इस	शास्त्र-विधानोक्तम् = शास्त्रविधिसे नियत किये हुए
कार्याकार्य-व्यवस्थितौ = कर्तव्य और अकर्तव्यकी व्यवस्थामें	कर्म = कर्मको (ही)
शास्त्रम् = शास्त्र (ही)	कर्तुम् = करनेके लिये
प्रमाणम् = प्रमाण है	अर्हसि = योग्य है

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभाग-
योगो नाम षोडशोऽध्यायः ॥ १६ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

ॐ श्रीपरमात्मने नमः

अथ सप्तदशोऽध्यायः

प्रधान विषय—१ से ६ तक श्रद्धाका और शास्त्रविपरीत घोर तप करनेवालोंका विषय। (७—२२) आहार, यज्ञ, तप और दानके पृथक् पृथक् भेद। (२३—२८) ॐ तत्सत्के प्रयोगकी व्याख्या।

अर्जुन उवाच

शास्त्रविधिको त्यागकर श्रद्धासे पूजन करनेवाले पुरुषोंकी निष्ठाके विषयमें अर्जुनका प्रश्न।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

ये, शास्त्रविधिम्, उत्सृज्य, यजन्ते, श्रद्धया, अन्विताः,
तेषाम्, निष्ठा, तु, का, कृष्ण, सत्त्वम्, आहो, रजः, तमः ॥१॥

इस प्रकार भगवान्‌के वचनोंको सुनकर अर्जुन बोला—

कृष्ण	= हे कृष्ण	**तेषाम्**	= उनकी
ये	= जो मनुष्य	**निष्ठा**	= स्थिति
शास्त्रविधिम्	= शास्त्रविधिको	**तु**	= फिर
		का	= कौनसी है (क्या)
उत्सृज्य	= त्यागकर (केवल)		
श्रद्धया	= श्रद्धासे	**सत्त्वम्**	= सात्त्विकी है
अन्विताः	= युक्त हुए	**आहो**	= अथवा
यजन्ते	= देवादिकोंका पूजन करते हैं	**रजः**	= राजसी (किंवा)
		तमः	= तामसी है

श्रीभगवानुवाच

गुणोंके अनुसार तीन प्रकारकी स्वाभाविक श्रद्धा का कथन।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

त्रिविधा, भवति, श्रद्धा, देहिनाम्, सा, स्वभावजा,
सात्त्विकी, राजसी, च, एव, तामसी, च, इति, ताम्, शृणु ॥२॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले, हे अर्जुन–

देहिनाम् = मनुष्योंकी	**राजसी** = राजसी
सा = वह (बिना शास्त्रीय संस्कारोंके केवल)	**च** = तथा
	तामसी = तामसी
	इति = ऐसे
	त्रिविधा = तीनों प्रकारकी
स्वभावजा = स्वभावसे उत्पन्न हुई *	**एव** = ही
	भवति = होती है
श्रद्धा = श्रद्धा	**ताम्** = उसको (तूं)
सात्त्विकी = सात्त्विकी	**(मत्तः)** = मेरेसे
च = और	**शृणु** = सुन

श्रद्धाके अनुसार पुरुषकी स्थिति-का कथन।

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥३॥

सत्त्वानुरूपा, सर्वस्य, श्रद्धा, भवति, भारत,
श्रद्धामयः, अयम्, पुरुषः, यः, यच्छ्रद्धः, सः, एव, सः ॥३॥

भारत = हे भारत	**भवति** = होती है (तथा)
सर्वस्य = सभी मनुष्योंकी	**अयम्** = यह
श्रद्धा = श्रद्धा	**पुरुषः** = पुरुष
सत्त्वानुरूपा = उनके अन्तःकरणके अनुरूप	**श्रद्धामयः** = श्रद्धामय है
	(अतः) = इसलिये
	यः = जो पुरुष

* अनन्त जन्मोंमें किये हुए कर्मोंके सञ्चित संस्कारोंसे उत्पन्न हुई श्रद्धा स्वभावजा श्रद्धा कही जाती है।

यच्छ्रद्धः	=जैसी श्रद्धावाला है	**एव**	=भी
सः	=वह स्वयम्	**सः**	=वही है

अर्थात् जैसी जिसकी श्रद्धा है वैसा ही उसका स्वरूप है।

देव, यक्ष और प्रेतादिके पूजनसे त्रिविध श्रद्धायुक्त पुरुषोंकी पहिचान।

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥

यजन्ते, सात्त्विकाः, देवान्, यक्षरक्षांसि, राजसाः, प्रेतान्, भूतगणान्, च, अन्ये, यजन्ते, तामसाः, जनाः ॥४॥

उनमें-

सात्त्विकाः	=सात्त्विक पुरुष (तो)		(तथा)
		अन्ये	=अन्य (जो)
देवान्	=देवोंको	**तामसाः**	=तामस
यजन्ते	=पूजते हैं (और)	**जनाः**	=मनुष्य हैं (वे)
राजसाः	=राजस पुरुष	**प्रेतान्**	=प्रेत
यक्षरक्षांसि	=यक्ष और राक्षसोंको	**च**	=और
		भूतगणान्	=भूतगणोंको
	(पूजते हैं)	**यजन्ते**	=पूजते हैं

शास्त्रसे विरुद्ध घोर तप करनेवालोंकी निन्दा।

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥५॥

अशास्त्रविहितम्, घोरम्, तप्यन्ते, ये, तपः, जनाः, दम्भाहंकारसंयुक्ताः, कामरागबलान्विताः ॥ ५ ॥

और हे अर्जुन-

ये	=जो		(केवल मनोकल्पित)
जनाः	=मनुष्य	**घोरम्**	=घोर
अशास्त्रविहितम्	=शास्त्रविधिसे रहित	**तपः**	=तपको
		तप्यन्ते	=तपते हैं (तथा)

दम्भाहंकार-संयुक्ताः = दम्भ और अहंकारसे युक्त (एवं) | कामराग-बलान्विताः = कामना, आसक्ति और बलके अभिमानसे भी युक्त हैं

[„] कर्षयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥

कर्षयन्तः, शरीरस्थम्, भूतग्रामम्, अचेतसः, माम्,
च, एव, अन्तःशरीरस्थम्, तान्, विद्धि, आसुरनिश्चयान् ॥६॥

तथा जो—

शरीरस्थम् = शरीररूपसे स्थित
भूतग्रामम् = भूतसमुदायको*
च = और
अन्तःशरीरस्थम् = अन्तःकरणमें स्थित
माम् = मुझ अन्तर्यामीको
एव = भी
कर्षयन्तः = कृश करनेवाले हैं†
तान् = उन
अचेतसः = अज्ञानियोंको (तू)
आसुरनिश्चयान् = आसुरी स्वभाववाले
विद्धि = जान

आहार, यज्ञ, तप और दानके भेदोंको सुननेके लिये भगवान्‌की आज्ञा ।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥

आहारः, तु, अपि, सर्वस्य, त्रिविधः, भवति, प्रियः,
यज्ञः, तपः, तथा, दानम्, तेषाम्, भेदम्, इमम्, शृणु ॥७॥

---

* अर्थात् शरीर, मन और इन्द्रियादिकोंके रूपमें परिणत हुए आकाशादि पांच भूतोंको ।

† शास्त्रसे विरुद्ध उपवासादि घोर आचरणोंद्वारा शरीरको सुखाना एवं भगवान्‌के अंशस्वरूप जीवात्माको क्लेश देना भूतसमुदायको और अन्तर्यामी परमात्माको कृश करना है ।

और हे अर्जुन! जैसे श्रद्धा तीन प्रकारकी होती है वैसे ही–

आहारः	= भोजन	**यज्ञः**	= यज्ञ
अपि	= भी	**तपः**	= तप (और)
सर्वस्य	= सबको (अपनी अपनी प्रकृतिके अनुसार)	**दानम्**	= दान भी (तीन तीन प्रकारके होते हैं)
त्रिविधः	= तीन प्रकारका	**तेषाम्**	= उनके
प्रियः	= प्रिय	**इमम्**	= इस
भवति	= होता है	**भेदम्**	= न्यारे न्यारे भेदको (तूं मेरेसे)
तु	= और		
तथा	= वैसे ही	**शृणु**	= सुन

सात्त्विक आहार के लक्षण।

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः,
रस्याः, स्निग्धाः, स्थिराः, हृद्याः, आहाराः, सात्त्विकप्रियाः॥८॥

आयुः	= आयु	**स्थिराः**	= स्थिर रहनेवाले* (तथा)
सत्त्व	= बुद्धि		
बल	= बल	**हृद्याः**	= स्वभावसे ही मनको प्रिय (ऐसे)
आरोग्य	= आरोग्य		
सुख	= सुख (और)		
प्रीति	= प्रीतिको	**आहाराः**	= आहार अर्थात् भोजन करनेके पदार्थ (तो)
विवर्धनाः	= बढ़ानेवाले (एवं)		
रस्याः	= रसयुक्त	**सात्त्विक-प्रियाः**	= सात्त्विक पुरुषको प्रिय होते हैं
स्निग्धाः	= चिकने (और)		

* जिस भोजनका सार शरीरमें बहुत कालतक रहता है उसको स्थिर रहनेवाला कहते हैं।

राजस आहार-के लक्षण।

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः,
आहाराः, राजसस्य, इष्टाः, दुःखशोकामयप्रदाः ॥९॥

और—

कटु	= कड़ुवे	**दुःखशोकामयप्रदाः**	= दुःख चिन्ता और रोगोंको उत्पन्न करनेवाले
अम्ल	= खट्टे	**आहाराः**	= आहार अर्थात् भोजन करनेके पदार्थ
लवण	= लवणयुक्त (और)	**राजसस्य**	= राजस पुरुषको
अत्युष्ण	= अति गरम (तथा)	**इष्टाः**	= प्रिय होते हैं
तीक्ष्ण	= तीक्ष्ण		
रूक्ष	= रूखे (और)		
विदाहिनः	= दाहकारक (एवं)		

तामस आहारके लक्षण।

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥१०॥

यातयामम्, गतरसम्, पूति, पर्युषितम्, च, यत्,
उच्छिष्टम्, अपि, च, अमेध्यम्, भोजनम्, तामसप्रियम् ॥१०॥

तथा—

यत्	= जो	**पूति**	= दुर्गन्धयुक्त (एवं)
भोजनम्	= भोजन	**पर्युषितम्**	= बासी (और)
यातयामम्	= अधपका	**उच्छिष्टम्**	= उच्छिष्ट है
गतरसम्	= रसरहित	**च**	= तथा (जो)
च	= और	**अमेध्यम्**	= अपवित्र

अपि	= भी है	**तामस-प्रियम्**	= तामस पुरुषको प्रिय होता है
(तत्)	= वह (भोजन)		

सात्त्विक यज्ञके लक्षण ।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥

अफलाकाङ्क्षिभिः, यज्ञः, विधिदृष्टः, यः, इज्यते,
यष्टव्यम्, एव, इति, मनः, समाधाय, सः, सात्त्विकः ॥११॥

और हे अर्जुन–

यः	= जो	**मनः**	= मनको
यज्ञः	= यज्ञ	**समाधाय**	= समाधान करके
विधिदृष्टः	= शास्त्रविधिसे नियत किया हुआ है (तथा)	**अफलाकाङ्क्षिभिः**	= फलको न चाहनेवाले पुरुषोंद्वारा
यष्टव्यम् एव	= करना ही कर्तव्य है	**इज्यते**	= किया जाता है
		सः	= वह (यज्ञ तो)
इति	= ऐसे	**सात्त्विकः**	= सात्त्विक है

राजस यज्ञके लक्षण ।

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥

अभिसन्धाय, तु, फलम्, दम्भार्थम्, अपि, च, एव, यत्,
इज्यते, भरतश्रेष्ठ, तम्, यज्ञम्, विद्धि, राजसम् ॥१२॥

तु	= और	**च**	= अथवा
भरतश्रेष्ठ	= हे अर्जुन	**फलम्**	= फलको
यत्	= जो (यज्ञ)	**अपि**	= भी
दम्भार्थम् एव	= केवल दम्भाचरणके ही लिये	**अभिसन्धाय**	= उद्देश्य रखकर
		इज्यते	= किया जाता है

तम्	= उस	**राजसम्**	= राजस
यज्ञम्	= यज्ञको (तूं)	**विद्धि**	= जान

तामस यज्ञके लक्षण ।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥

विधिहीनम्, असृष्टान्नम्, मन्त्रहीनम्, अदक्षिणम्,
श्रद्धाविरहितम्, यज्ञम्, तामसम्, परिचक्षते ॥१३॥

तथा–

विधिहीनम्	= शास्त्रविधिसे हीन (और)		(और)
असृष्टान्नम्	= अन्नदानसे रहित (एवं)	**श्रद्धा-विरहितम्**	= बिना श्रद्धाके किये हुए
मन्त्रहीनम्	= बिना मन्त्रोंके	**यज्ञम्**	= यज्ञको
अदक्षिणम्	= बिना दक्षिणाके	**तामसम्**	= तामस (यज्ञ)
		परिचक्षते	= कहते हैं

शारीरिक तपके लक्षण ।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥

देवद्विजगुरुप्राज्ञपूजनम्, शौचम्, आर्जवम्,
ब्रह्मचर्यम्, अहिंसा, च, शारीरम्, तपः, उच्यते ॥१४॥

तथा हे अर्जुन–

देव	= देवता	**शौचम्**	= पवित्रता
द्विज	= ब्राह्मण	**आर्जवम्**	= सरलता
गुरु	= गुरु* (और)	**ब्रह्मचर्यम्**	= ब्रह्मचर्य
प्राज्ञ	= ज्ञानीजनोंका	**च**	= और
पूजनम्	= पूजन (एवं)	**अहिंसा**	= अहिंसा

* यहां गुरु शब्दसे माता, पिता, आचार्य और वृद्ध एवं अपनेसे जो किसी प्रकार भी बड़े हों, उन सबको समझना चाहिये ।

	(यह)	**तपः**	= तप
शारीरम्	= शरीरसंबन्धी	**उच्यते**	= कहा जाता है

वाणीसंबन्धी तप के लक्षण ।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

अनुद्वेगकरम्, वाक्यम्, सत्यम्, प्रियहितम्, च, यत्,
स्वाध्यायाभ्यसनम्, च, एव, वाङ्मयम्, तपः, उच्यते ॥१५॥

च	= तथा	**स्वाध्यायाभ्यसनम्**	= वेद शास्त्रोंके पढ़नेका एवं परमेश्वरके नाम जपनेका अभ्यास है
यत्	= जो	(तत्)	= वह
अनुद्वेगकरम्	= उद्वेगको न करनेवाला	**एव**	= निःसन्देह
प्रियहितम्	= प्रिय और हितकारक	**वाङ्मयम्**	= वाणीसंबन्धी
	(एवं)	**तपः**	= तप
सत्यम्	= यथार्थ	**उच्यते**	= कहा जाता है
वाक्यम्	= भाषण है *		
च	= और (जो)		

मानसिक तपके लक्षण ।

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥

मनःप्रसादः, सौम्यत्वम्, मौनम्, आत्मविनिग्रहः,
भावसंशुद्धिः, इति, एतत्, तपः, मानसम्, उच्यते ॥१६॥

तथा–

मनःप्रसादः	= मनकी प्रसन्नता		(और)
		सौम्यत्वम्	= शान्तभाव(एवं)

* मन और इन्द्रियोंद्वारा जैसा अनुभव किया हो, ठीक वैसा ही कहनेका नाम यथार्थ भाषण है ।

मौनम्	= भगवत्-चिन्तन करनेका स्वभाव	इति	= ऐसे
आत्म-विनिग्रहः	= मनका निग्रह (और)	एतत्	= यह
भाव-संशुद्धिः	= अन्तःकरणकी पवित्रता	मानसम्	= मनसंबन्धी
		तपः	= तप
		उच्यते	= कहा जाता है

सात्त्विक तपके लक्षण ।

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥

श्रद्धया, परया, तप्तम्, तपः, तत्, त्रिविधम्, नरैः,
अफलाकाङ्क्षिभिः, युक्तैः, सात्त्विकम्, परिचक्षते ॥१७॥

परन्तु हे अर्जुन –

अफला-काङ्क्षिभिः	= फलको न चाहनेवाले	तप्तम्	= किये हुए
युक्तैः	= निष्कामी योगी	तत्	= उस (पूर्वोक्त)
नरैः	= पुरुषोंद्वारा	त्रिविधम्	= तीन प्रकारके
परया	= परम	तपः	= तपको (तो)
श्रद्धया	= श्रद्धासे	सात्त्विकम्	= सात्त्विक
		परिचक्षते	= कहते हैं

राजस तपके लक्षण ।

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥

सत्कारमानपूजार्थम्, तपः, दम्भेन, च, एव, यत्,
क्रियते, तत्, इह, प्रोक्तम्, राजसम्, चलम्, अध्रुवम् ॥१८॥

च	= और	सत्कार-मानपूजार्थम्	= सत्कार, मान और पूजाके लिये
यत्	= जो		
तपः	= तप		

(वा)	=अथवा	**चलम्**	=क्षणिक फलवाला (तप)
दम्भेन	=केवल पाखण्डसे	**इह**	=यहां
एव	=ही	**राजसम्**	=राजस
क्रियते	=किया जाता है	**प्रोक्तम्**	=कहा गया है
तत्	=वह		
अध्रुवम्	=अनिश्चित* (और)		

तामस तपके लक्षण।

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥

मूढग्राहेण, आत्मनः, यत्, पीडया, क्रियते, तपः,
परस्य, उत्सादनार्थम्, वा, तत्, तामसम्, उदाहृतम् ॥१९॥

और–

यत्	=जो	**परस्य**	=दूसरेका
तपः	=तप	**उत्सादनार्थम्**	=अनिष्ट करनेके लिये
मूढग्राहेण	=मूढतापूर्वक हठसे	**क्रियते**	=किया जाता है
आत्मनः	=मन, वाणी और शरीरकी	**तत्**	=वह (तप)
पीडया	=पीड़ाके सहित	**तामसम्**	=तामस
वा	=अथवा	**उदाहृतम्**	=कहा गया है

सात्त्विक दानके लक्षण।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

दातव्यम्, इति, यत्, दानम्, दीयते, अनुपकारिणे,
देशे, काले, च, पात्रे, च, तत्, दानम्, सात्त्विकम्, स्मृतम् ॥२०॥

* अनिश्चित फलवाला उसको कहते हैं कि जिसका फल होने न होनेमें शङ्का हो।

च	= और (हे अर्जुन)	पात्रे	= पात्रके‡ प्राप्त होनेपर
दातव्यम्	= दान देना ही कर्तव्य है	अनुपकारिणे	= प्रत्युपकार न करनेवालेके लिये
इति	= ऐसे भावसे	दीयते	= दिया जाता है
यत्	= जो	तत्	= वह
दानम्	= दान	दानम्	= दान (तो)
देशे	= देश*	सात्त्विकम्	= सात्त्विक
काले	= काल†	स्मृतम्	= कहा गया है
च	= और		

राजस दानके लक्षण।

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥

यत्, तु, प्रत्युपकारार्थम्, फलम्, उद्दिश्य, वा, पुनः, दीयते, च, परिक्लिष्टम्, तत्, दानम्, राजसम्, स्मृतम् ॥

तु	= और	च	= तथा
यत्	= जो दान	प्रत्युपकारार्थम्	= प्रत्युपकारके प्रयोजनसे×
परिक्लिष्टम्	= क्लेशपूर्वक§		

*-† जिस देश-कालमें जिस वस्तुका अभाव हो वही देश-काल उस वस्तुद्वारा प्राणियोंकी सेवा करनेके लिये योग्य समझा जाता है।

‡ भूखे, अनाथ, दुःखी, रोगी और असमर्थ तथा भिक्षुक आदि तो अन्न, वस्त्र और ओषधि एवं जिस वस्तुका जिसके पास अभाव हो उस वस्तुद्वारा सेवा करनेके लिये योग्य पात्र समझे जाते हैं और श्रेष्ठ आचरणों-वाले विद्वान् ब्राह्मणजन धनादि सब प्रकारके पदार्थोंद्वारा सेवा करनेके लिये योग्य पात्र समझे जाते हैं।

§ जैसे प्रायः वर्तमान समयके चन्दे चिट्ठे आदिमें धन दिया जाता है।

× अर्थात् बदलेमें अपना सांसारिक कार्य सिद्ध करनेकी आशासे।

वा	= अथवा	तत्	= वह
फलम्	= फलको	दानम्	= दान
उद्दिश्य	= उद्देश्य रखकर*	राजसम्	= राजस
पुनः	= फिर	स्मृतम्	= कहा गया है
दीयते	= दिया जाता है		

तामस दान के लक्षण।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥

अदेशकाले, यत्, दानम्, अपात्रेभ्यः, च, दीयते,
असत्कृतम्, अवज्ञातम्, तत्, तामसम्, उदाहृतम् ॥२२॥

च	= और	अदेशकाले	= अयोग्य देश-कालमें
यत्	= जो	अपात्रेभ्यः	= कुपात्रोंके लिये†
दानम्	= दान	दीयते	= दिया जाता है
असत्कृतम्	= बिना सत्कार किये	तत्	= वह (दान)
(वा)	= अथवा	तामसम्	= तामस
अवज्ञातम्	= तिरस्कारपूर्वक	उदाहृतम्	= कहा गया है

ॐ तत्सत्‌की महिमा।

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥

ॐ तत्सत्, इति, निर्देशः, ब्रह्मणः, त्रिविधः, स्मृतः,
ब्राह्मणाः, तेन, वेदाः, च, यज्ञाः, च, विहिताः, पुरा ॥२३॥

---

* अर्थात् मान, बड़ाई, प्रतिष्ठा और स्वर्गादिकी प्राप्तिके लिये अथवा रोगादिकी निवृत्तिके लिये ।

† अर्थात् मद्य-मांसादि अभक्ष्य वस्तुओंके खानेवालों एवं चोरी जारी आदि नीचकर्म करनेवालोंके लिये ।

और हे अर्जुन–

ॐ	= ॐ	तेन	= उसीसे
तत्	= तत्	पुरा	= सृष्टिके आदिकालमें
सत्	= सत्	ब्राह्मणाः	= ब्राह्मण
इति	= ऐसे (यह)	च	= और
त्रिविधः	= तीन प्रकारका	वेदाः	= वेद
ब्रह्मणः	= सच्चिदानन्दघन ब्रह्मका	च	= तथा
निर्देशः	= नाम	यज्ञाः	= यज्ञादिक
स्मृतः	= कहा है	विहिताः	= रचे गये हैं

ओंकारके प्रयोग की व्याख्या ।

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४॥

तस्मात्, ॐ, इति, उदाहृत्य, यज्ञदानतपःक्रियाः,
प्रवर्तन्ते, विधानोक्ताः, सततम्, ब्रह्मवादिनाम् ॥२४॥

तस्मात्	= इसलिये	सततम्	= सदा
ब्रह्मवादिनाम्	= वेदको कथन करनेवाले श्रेष्ठ पुरुषोंकी	ॐ	= ॐ
		इति	= ऐसे (इस परमात्माके नामको)
विधानोक्ताः	= शास्त्रविधिसे नियत की हुई	उदाहृत्य	= उच्चारण करके (हीं)
यज्ञदानतपःक्रियाः	= यज्ञ, दान और तपरूपक्रियायें	प्रवर्तन्ते	= आरम्भ होती हैं

तत् शब्दके प्रयोगकीव्याख्या

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥

तत्, इति, अनभिसंधाय, फलम्, यज्ञतपःक्रियाः,
दानक्रियाः, च, विविधाः, क्रियन्ते, मोक्षकाङ्क्षिभिः ॥२५॥

और-

तत्	= तत् अर्थात् तत् नामसे कहे जानेवाले परमात्माका ही यह सब है	**यज्ञतपः-क्रियाः**	= यज्ञ तपरूप क्रियायें
इति	= ऐसे (इस भावसे)	**च**	= तथा
फलम्	= फलको	**दानक्रियाः**	= दानरूप क्रियायें
अनभि-संधाय	= न चाहकर	**मोक्ष-काङ्क्षिभिः**	= कल्याणकी इच्छावाले पुरुषोंद्वारा
विविधाः	= नाना प्रकारकी	**क्रियन्ते**	= की जाती हैं

सत् शब्दके प्रयोग की व्याख्या ।

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥

सद्भावे, साधुभावे, च, सत्, इति, एतत्, प्रयुज्यते,
प्रशस्ते, कर्मणि, तथा, सत्, शब्दः, पार्थ, युज्यते ॥२६॥

और-

सत्	= सत्	**प्रयुज्यते**	= प्रयोग किया जाता है
इति	= ऐसे	**तथा**	= तथा
एतत्	= यह (परमात्माका नाम)	**पार्थ**	= हे पार्थ
सद्भावे	= सत्यभावमें	**प्रशस्ते**	= उत्तम
च	= और	**कर्मणि**	= कर्ममें (भी)
साधुभावे	= श्रेष्ठभावमें	**सत्**	= सत्

शब्दः	= शब्द	**युज्यते**	= प्रयोग किया जाता है

[„] **यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।**
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥

यज्ञे, तपसि, दाने, च, स्थितिः, सत्, इति, च, उच्यते,
कर्म, च, एव, तदर्थीयम्, सत्, इति, एव, अभिधीयते ॥२७॥

च	= तथा	**इति**	= ऐसे
यज्ञे	= यज्ञ	**उच्यते**	= कही जाती है
तपसि	= तप	**च**	= और
च	= और	**तदर्थीयम्**	= उस परमात्माके अर्थ किया हुआ
दाने	= दानमें		
(या)	= जो	**कर्म**	= कर्म
स्थितिः	= स्थिति है	**एव**	= निश्चयपूर्वक
(सा)	= वह	**सत्**	= सत् है
एव	= भी	**इति**	= ऐसे
सत्	= सत् है	**अभिधीयते**	= कहा जाता है

अश्रद्धासे किये हुए कर्मकी निन्दा ।

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥

अश्रद्धया, हुतम्, दत्तम्, तपः, तप्तम्, कृतम्, च, यत्,
असत्, इति, उच्यते, पार्थ, न, च, तत्, प्रेत्य, नो, इह ॥२८॥

और–

पार्थ	= हे अर्जुन	**तप्तम्**	= तपा हुआ
अश्रद्धया	= बिना श्रद्धाके	**तपः**	= तप
हुतम्	= होमा हुआ हवन (तथा)	**च**	= और
		यत्	= जो (कुछ भी)
दत्तम्	= दिया हुआ दान (एवं)	**कृतम्**	= किया हुआ कर्म है

(तत्)	=वह (समस्त)	नो	=न (तो)
असत्	=असत्	इह	=इस लोकमें (लाभदायक है)
इति	=ऐसे	च	=और
उच्यते	=कहा जाता है (इसलिये)	न	=न
तत्	=वह	प्रेत्य	=मरनेके पीछे (ही लाभदायक है)

इसलिये मनुष्यको चाहिये कि सच्चिदानन्दघन परमात्माके नामका निरन्तर चिन्तन करता हुआ निष्कामभावसे केवल परमेश्वरके लिये शास्त्रविधिसे नियत किये हुए कर्मोंका परम श्रद्धा और उत्साहके सहित आचरण करे ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥

अथाष्टादशोऽध्यायः

प्रधान विषय—१ से १२ तक त्यागका विषय । (१३—१८) कर्मोंके होनेमें सांख्यसिद्धान्तका कथन । (१९—४०) तीनों गुणोंके अनुसार ज्ञान, कर्म, कर्ता, बुद्धि, धृति और सुखके पृथक् पृथक् भेद । (४१—४८) फलसहित वर्णधर्मका विषय । (४९—५५) ज्ञाननिष्ठाका विषय । (५६—६६) भक्तिसहित निष्काम कर्मयोगका विषय । (६७—७८) श्रीगीताजीका माहात्म्य ।

अर्जुन उवाच

संन्यास और त्यागका तत्त्व जाननेके लिये अर्जुनका प्रश्न ।

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१॥

संन्यासस्य, महाबाहो, तत्त्वम्, इच्छामि, वेदितुम्, त्यागस्य, च, हृषीकेश, पृथक्, केशिनिषूदन ॥१॥

उसके उपरान्त अर्जुन बोला—

महाबाहो	=हे महाबाहो	हृषीकेश	=हे अन्तर्यामिन्

केशि-निषूदन	= हे वासुदेव (मैं)	**तत्त्वम्**	= तत्त्वको
संन्यासस्य	= संन्यास	**पृथक्**	= पृथक् पृथक्
च	= और	**वेदितुम्**	= जानना
त्यागस्य	= त्यागके	**इच्छामि**	= चाहता हूं

श्रीभगवानुवाच

त्यागके विषयमें दूसरों के ४ सिद्धान्तों का कथन।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥

काम्यानाम्, कर्मणाम्, न्यासम्, संन्यासम्, कवयः, विदुः,
सर्वकर्मफलत्यागम्, प्राहुः, त्यागम्, विचक्षणाः ॥२॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले, हे अर्जुन ! कितने ही–

कवयः	= पण्डितजन (तो)	**(च)**	= और (कितने ही)
काम्यानाम्	= काम्य*	**विचक्षणाः**	= विचारकुशल पुरुष
कर्मणाम्	= कर्मोंके		
न्यासम्	= त्यागको		
संन्यासम्	= संन्यास	**सर्वकर्म-फलत्यागम्**	= सबकर्मोंकेफल-के त्यागको †
विदुः	= जानते हैं		

* स्त्री, पुत्र और धन आदि प्रिय वस्तुओंकी प्राप्तिके लिये तथा रोग-सङ्कटादिकी निवृत्तिके लिये जो यज्ञ, दान, तप और उपासना आदि कर्म किये जाते हैं, उनका नाम 'काम्यकर्म' है।

† ईश्वरकी भक्ति, देवताओंका पूजन, माता-पिता आदि गुरुजनोंकी सेवा, यज्ञ, दान और तप तथा वर्णाश्रमके अनुसार आजीविकाद्वारा गृहस्थका निर्वाह एवं शरीरसम्बन्धी खानपान इत्यादिक जितने कर्तव्य कर्म हैं उन सबमें इस लोक और परलोककी संपूर्ण कामनाओंके त्यागका नाम सब कर्मोंके फलका त्याग है।

त्यागम् = त्याग	प्राहुः = कहते हैं

[„] **त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।**
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥३॥

त्याज्यम्, दोषवत्, इति, एके, कर्म, प्राहुः, मनीषिणः,
यज्ञदानतपःकर्म, न, त्याज्यम्, इति, च, अपरे ॥३॥

तथा–

एके = कई एक	**च** = और
मनीषिणः = विद्वान्	**अपरे** = दूसरे विद्वान्
इति = ऐसे	**इति** = ऐसे
प्राहुः = कहते हैं (कि)	**(आहुः)** = कहते हैं (कि)
कर्म = कर्म (सभी)	**यज्ञदान-तपःकर्म** = यज्ञ, दान और तपरूप कर्म
दोषवत् = दोषयुक्त हैं (इसलिये)	**न त्याज्यम्** = त्यागने योग्य नहीं हैं
त्याज्यम् = त्यागनेके योग्य हैं	

त्यागके विषयमें अपना निश्चय कहनेके लिये भगवान् का कथन ।

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥४॥

निश्चयम्, शृणु, मे, तत्र, त्यागे, भरतसत्तम,
त्यागः, हि, पुरुषव्याघ्र, त्रिविधः, संप्रकीर्तितः ॥ ४ ॥

परन्तु–

भरतसत्तम = हे अर्जुन	**मे** = मेरे
तत्र = उस	**निश्चयम्** = निश्चयको
त्यागे = त्यागके विषयमें (तूं)	**शृणु** = सुन
	पुरुषव्याघ्र = हे पुरुषश्रेष्ठ (वह)

त्यागः	= त्याग (सात्त्विक राजस और तामस ऐसे)	**त्रिविधः**	= तीनों प्रकारका
		हि	= ही
		संप्रकीर्तितः	= कहा गया है

यज्ञ, दान और तपरूप कर्मोंके त्यागका निषेध।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥

यज्ञदानतपःकर्म , न, त्याज्यम्, कार्यम्, एव, तत्,
यज्ञः, दानम्, तपः, च, एव, पावनानि, मनीषिणाम् ॥५॥

तथा–

यज्ञदान-तपःकर्म	= यज्ञ, दान और तपरूप कर्म	**यज्ञः**	= यज्ञ
		दानम्	= दान
न त्याज्यम्	= त्यागनेके योग्य नहीं है (किन्तु)	**च**	= और
		तपः	= तप (यह तीनों)
तत्	= वह	**एव**	= ही
एव	= निःसन्देह	**मनीषिणाम्**	= बुद्धिमान्* पुरुषोंको
कार्यम्	= करना कर्तव्य है (क्योंकि)	**पावनानि**	= पवित्र करने-वाले हैं

यज्ञ, दान और तप आदि कर्मोंमें फल तथा आसक्तिके त्यागका कथन।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

एतानि, अपि, तु, कर्माणि, सङ्गम्, त्यक्त्वा, फलानि, च,
कर्तव्यानि, इति, मे, पार्थ, निश्चितम् , मतम्, उत्तमम् ॥६॥

---

* वह मनुष्य बुद्धिमान् है जो कि फल और आसक्तिको त्यागकर केवल भगवत्-अर्थ कर्म करता है ।

इसलिये–

पार्थ	= हे पार्थ	**फलानि**	= फलोंको
एतानि	= यह यज्ञ, दान और तपरूप कर्म	**त्यक्त्वा**	= त्यागकर (अवश्य)
तु	= तथा	**कर्तव्यानि**	= करने चाहिये
(अन्यानि)	= और	**इति**	= ऐसा
अपि	= भी	**मे**	= मेरा
कर्माणि	= संपूर्ण श्रेष्ठ कर्म	**निश्चितम्**	= निश्चय किया हुआ
सङ्गम्	= आसक्तिको	**उत्तमम्**	= उत्तम
च	= और	**मतम्**	= मत है

तामस त्यागके लक्षण ।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥७॥

नियतस्य, तु, संन्यासः, कर्मणः, न, उपपद्यते,
मोहात्, तस्य, परित्यागः, तामसः, परिकीर्तितः ॥७॥

तु	= और (हे अर्जुन)		(इसलिये)
नियतस्य	= नियत*	**मोहात्**	= मोहसे
कर्मणः	= कर्मका	**तस्य**	= उसका
संन्यासः	= त्याग करना	**परित्यागः**	= त्याग करना
न उपपद्यते	= योग्य नहीं है	**तामसः**	= तामस त्याग
		परिकीर्तितः	= कहा गया है

राजस त्यागके लक्षण ।

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥

दुःखम्, इति, एव, यत्, कर्म, कायक्लेशभयात्, त्यजेत्,
सः, कृत्वा, राजसम्, त्यागम्, न, एव, त्यागफलम्, लभेत् ॥८॥

* इसी अध्यायके श्लोक ४८ की टिप्पणीमें इसका अर्थ देखना चाहिये ।

और यदि कोई मनुष्य–

यत्	= जो (कुछ)	**त्यजेत्**	= त्याग कर दे (तो)
कर्म	= कर्म है	**सः**	= वह पुरुष (उस)
(तत्)	= वह (सब)	**राजसम्**	= राजस
एव	= ही	**त्यागम्**	= त्यागको
दुःखम्	= दुःखरूप है	**कृत्वा**	= करके
इति	= ऐसे (समझकर)	**एव**	= भी
कायक्लेश-भयात्	= शारीरिक क्लेशके भयसे (कर्मोंका)	**त्यागफलम्**	= त्यागके फलको
		न लभेत्	= प्राप्त नहीं होता है–

अर्थात् उसका वह त्याग करना व्यर्थ ही होता है।

सात्त्विक त्याग-के लक्षण।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥

कार्यम्, इति, एव, यत्, कर्म, नियतम्, क्रियते, अर्जुन,
सङ्गम्, त्यक्त्वा, फलम्, च, एव, सः, त्यागः, सात्त्विकः, मतः॥९॥

और–

अर्जुन	= हे अर्जुन	**सङ्गम्**	= आसक्तिको
कार्यम्	= करना कर्तव्य है	**च**	= और
इति	= ऐसे (समझकर)	**फलम्**	= फलको
एव	= ही	**त्यक्त्वा**	= त्यागकर
यत्	= जो	**क्रियते**	= किया जाता है
नियतम्	= शास्त्रविधिसे नियत किया हुआ कर्तव्य	**सः**	= वह
		एव	= ही
कर्म	= कर्म	**सात्त्विकः**	= सात्त्विक

त्यागः	= त्याग	**मतः**	= माना गया है–

अर्थात् कर्तव्य कर्मोंको स्वरूपसे न त्यागकर उनमें जो आसक्ति और फलका त्यागना है वही सात्त्विक त्याग माना गया है ।

रागद्वेषके त्यागसे त्यागी के लक्षण ।

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥१०॥

न, द्वेष्टि, अकुशलम्, कर्म, कुशले, न, अनुषज्जते,
त्यागी, सत्त्वसमाविष्टः, मेधावी, छिन्नसंशयः ॥१०॥

और हे अर्जुन जो पुरुष–

अकुशलम्	= अकल्याण-कारक	**न अनुषज्जते**	= आसक्त नहीं होता है (वह)
कर्म	= कर्मसे (तो)	**सत्त्व-समाविष्टः**	= शुद्ध सत्त्वगुण-से युक्त हुआ पुरुष
न द्वेष्टि	= द्वेष नहीं करता है (और)	**छिन्नसंशयः**	= संशयरहित
कुशले	= कल्याण-कारक कर्ममें	**मेधावी**	= ज्ञानवान् (और)
		त्यागी	= त्यागी है

स्वरूपसे सर्व कर्म त्यागमें अशक्यता का कथन और कर्म-फलके त्यागसे त्यागीका लक्षण

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥

न, हि, देहभृता, शक्यम्, त्यक्तुम्, कर्माणि, अशेषतः,
यः, तु, कर्मफलत्यागी, सः, त्यागी, इति, अभिधीयते ॥११॥

हि	= क्योंकि	**अशेषतः**	= संपूर्णतासे
देहभृता	= देहधारी पुरुषके द्वारा	**कर्माणि**	= सब कर्म
		त्यक्तुम्	= त्यागे जानेको

नशक्यम्	= शक्य नहीं हैं	**सः**	= वह
(तस्मात्)	= इससे	**तु**	= ही
यः	= जो पुरुष	**त्यागी**	= त्यागी है
कर्मफल-त्यागी	= कर्मोंके फलका त्यागी है	**इति**	= ऐसे
		अभिधीयते	= कहा जाता है

सकामी पुरुषोंको कर्मफलकी प्राप्ति और त्यागी पुरुषोंके लिये सर्वथा कर्मफलके अभावका कथन

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥

अनिष्टम्, इष्टम्, मिश्रम्, च, त्रिविधम्, कर्मणः, फलम्, भवति, अत्यागिनाम्, प्रेत्य, न, तु, संन्यासिनाम्, क्वचित् । १२ ।

तथा—

अत्यागिनाम्	= सकामी पुरुषोंके	**प्रेत्य**	= मरनेके पश्चात् (भी)
कर्मणः	= कर्मका (ही)	**भवति**	= होता है
इष्टम्	= अच्छा	**तु**	= और
अनिष्टम्	= बुरा	**संन्यासिनाम्**	= त्यागी* पुरुषोंके
च	= और		(कर्मोंका फल)
मिश्रम्	= मिला हुआ		
(इति)	= ऐसे	**क्वचित्**	= किसी कालमें भी
त्रिविधम्	= तीन प्रकारका		
फलम्	= फल	**न**	= नहीं होता—

क्योंकि उनके द्वारा होनेवाले कर्म वास्तवमें कर्म नहीं हैं ।

* संपूर्ण कर्तव्यकर्मोंमें फल, आसक्ति और कर्तापनके अभिमानको जिसने त्याग दिया है उसीका नाम त्यागी है ।

संपूर्ण कर्मोंके होनेमें अधिष्ठानादि पञ्च हेतुओं का निरूपण।

पञ्चैतानि महाबाहो कारणानि निबोध मे।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥

पञ्च, एतानि, महाबाहो, कारणानि, निबोध, मे,
सांख्ये, कृतान्ते, प्रोक्तानि, सिद्धये, सर्वकर्मणाम्॥१३॥

और–

महाबाहो	=हे महाबाहो	**सांख्ये**	=सांख्य
सर्वकर्मणाम्	=संपूर्ण कर्मोंकी	**कृतान्ते**	=सिद्धान्तमें
सिद्धये	=सिद्धिके लिये*	**प्रोक्तानि**	=कहे गये हैं
एतानि	=यह	**(तानि)**	=उनको (तूं)
पञ्च	=पांच	**मे**	=मेरेसे
कारणानि	=हेतु	**निबोध**	=भली प्रकार जान

[,,] अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥१४॥

अधिष्ठानम्, तथा, कर्ता, करणम्, च, पृथग्विधम्,
विविधाः, च, पृथक्, चेष्टाः, दैवम्, च, एव, अत्र, पञ्चमम्॥१४॥

और हे अर्जुन–

अत्र	=इस विषयमें	**च**	=तथा
अधिष्ठानम्	=आधार†	**पृथग्विधम्**	=न्यारे न्यारे
च	=और	**करणम्**	=करण‡
कर्ता	=कर्ता	**च**	=और

* अर्थात् संपूर्ण कर्मोंके सिद्ध होनेमें।

† जिसके आश्रय कर्म किये जायं उसका नाम आधार है।

‡ जिन जिन इन्द्रियादि और साधनोंके द्वारा कर्म किये जाते हैं उनका नाम करण है।

विविधाः	= नाना प्रकारकी	**एव**	= ही
पृथक	= न्यारी न्यारी	**पञ्चमम्**	= पांचवां हेतु
चेष्टाः	= चेष्टा (एवं)	**दैवम्**	= दैव*
तथा	= वैसे		(कहा गया है)

[„] **शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।**
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

शरीरवाङ्मनोभिः, यत्, कर्म, प्रारभते, नरः,
न्याय्यम्, वा, विपरीतम्, वा, पञ्च, एते, तस्य, हेतवः ॥१५॥

क्योंकि–

नरः	= मनुष्य	**यत्**	= जो (कुछ)
शरीरवाङ्-मनोभिः	= मन, वाणी और शरीरसे	**कर्म**	= कर्म
		प्रारभते	= आरम्भ करता है
न्याय्यम्	= शास्त्रके अनुसार	**तस्य**	= उसके
वा	= अथवा	**एते**	= यह
विपरीतम्	= विपरीत	**पञ्च**	= पांचों (ही)
वा	= भी	**हेतवः**	= कारण हैं

आत्माको कर्ता माननेवाले की निन्दा ।

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१६॥

तत्र, एवम्, सति, कर्तारम्, आत्मानम्, केवलम्, तु, यः,
पश्यति, अकृतबुद्धित्वात्, न, सः, पश्यति, दुर्मतिः ॥१६॥

तु	= परन्तु	**यः**	= जो पुरुष
एवम्	= ऐसा	**अकृत-बुद्धित्वात्**	= अशुद्धबुद्धि† होनेके कारण
सति	= होनेपर भी		

* पूर्वकृत शुभाशुभ कर्मोंके संस्कारोंका नाम दैव है ।

† सत्सङ्ग और शास्त्रके अभ्याससे तथा भगवत्-अर्थ कर्म और उपासनाके

तत्र	= उस विषयमें	पश्यति	= देखता है
केवलम्	= केवल शुद्ध-स्वरूप	सः	= वह
आत्मानम्	= आत्माको	दुर्मतिः	= मलिन बुद्धि-वाला अज्ञानी
कर्तारम्	= कर्ता	न पश्यति	= यथार्थ नहीं देखता है

आत्माको अकर्ता माननेवाले की प्रशंसा।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥१७॥

यस्य, न, अहंकृतः, भावः, बुद्धिः, यस्य, न, लिप्यते,
हत्वा, अपि, सः, इमान्, लोकान्, न, हन्ति, न, निबध्यते।१७।

और हे अर्जुन–

यस्य	= जिस पुरुषके (अन्तःकरणमें)	सः	= वह पुरुष
अहंकृतः	= मैं कर्ता हूं (ऐसा)	इमान्	= इन
भावः	= भाव	लोकान्	= सब लोकोंको
न	= नहीं है (तथा)	हत्वा	= मारकर
यस्य	= जिसकी	अपि	= भी (वास्तवमें)
बुद्धिः	= बुद्धि (सांसारिक पदार्थोंमें और संपूर्ण कर्मोंमें)	न	= न (तो)
		हन्ति	= मारता है (और)
न लिप्यते	= लिपायमान नहीं होती	न	= न
		निबध्यते	= पापसे बंधता है*

करनेसे मनुष्यकी बुद्धि शुद्ध होती है इसलिये जो उपरोक्त साधनोंसे रहित है उसकी बुद्धि अशुद्ध है ऐसा समझना चाहिये।

* जैसे अग्नि, वायु और जलके द्वारा प्रारब्धवश किसी प्राणीकी हिंसा होती देखनेमें आवे तो भी वह वास्तवमें हिंसा नहीं है, वैसे ही जिस

कर्मप्रेरक और कर्मसंग्रह का निर्णय ।

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८॥

ज्ञानम्, ज्ञेयम्, परिज्ञाता, त्रिविधा, कर्मचोदना,
करणम्, कर्म, कर्ता, इति, त्रिविधः, कर्मसंग्रहः ॥१८॥

तथा हे भारत–

परिज्ञाता	= ज्ञाता*		(और)
ज्ञानम्	= ज्ञान† (और)	**कर्ता**	= कर्ता§
ज्ञेयम्	= ज्ञेय‡	**करणम्**	= करण× (और)
त्रिविधा	= यह तीनों (तो)	**कर्म**	= क्रिया+
कर्मचोदना	= कर्मके प्रेरक हैं अर्थात् इन तीनोंके संयोगसे तो कर्ममें प्रवृत्त होनेकी इच्छा उत्पन्न होती है	**इति**	= यह
		त्रिविधः	= तीनों
		कर्मसंग्रहः	= कर्मके संग्रह हैं अर्थात् इन तीनोंके संयोगसेकर्मबनताहै

पुरुषका देहमें अभिमान नहीं है और स्वार्थरहित केवल संसारके हितके लिये ही जिसकी सम्पूर्ण क्रियायें होती हैं उस पुरुषके शरीर और इन्द्रियों-द्वारा यदि किसी प्राणीकी हिंसा होती हुई लोकदृष्टिमें देखी जाय तो भी वह वास्तवमें हिंसा नहीं है क्योंकि आसक्ति, स्वार्थ और अहंकारके न होनेसे किसी प्राणीकी हिंसा हो ही नहीं सकती तथा बिना कर्तृत्व अभिमानके किया हुआ कर्म वास्तवमें अकर्म ही है इसलिये वह पुरुष पापसे नहीं बंधता है ।

* जाननेवालेका नाम ज्ञाता है ।

† जिसके द्वारा जाना जाय उसका नाम ज्ञान है ।

‡ जाननेमें आनेवाली वस्तुका नाम ज्ञेय है ।

§ कर्म करनेवालेका नाम कर्ता है ।

× जिन साधनोंसे कर्म किया जाय उनका नाम करण है ।

\+ करनेका नाम क्रिया है ।

तीनों गुणोंके अनुसार ज्ञान, कर्म और कर्ताके भेदोंको सुननेके लिये भगवान्‌की आज्ञा।

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥

ज्ञानम्, कर्म, च, कर्ता, च, त्रिधा, एव, गुणभेदतः,
प्रोच्यते, गुणसंख्याने, यथावत्, शृणु, तानि, अपि ॥१९॥

उन सबमें–

ज्ञानम्	= ज्ञान	**गुणसंख्याने**	= सांख्यशास्त्रमें
च	= और	**त्रिधा**	= तीन तीन प्रकारसे
कर्म	= कर्म	**प्रोच्यते**	= कहे गये हैं
च	= तथा	**तानि**	= उनको
कर्ता	= कर्ता	**अपि**	= भी (तूं मेरेसे)
एव	= भी	**यथावत्**	= भली प्रकार
गुणभेदतः	= गुणोंके भेदसे	**शृणु**	= सुन

सात्त्विक ज्ञानके लक्षण।

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥

सर्वभूतेषु, येन, एकम्, भावम्, अव्ययम्, ईक्षते,
अविभक्तम्, विभक्तेषु, तत्, ज्ञानम्, विद्धि, सात्त्विकम् ॥२०॥

हे अर्जुन–

येन	= जिस ज्ञानसे (मनुष्य)	**अविभक्तम्**	= विभागरहित (समभावसे स्थित)
विभक्तेषु	= पृथक् पृथक्	**ईक्षते**	= देखता है
सर्वभूतेषु	= सब भूतोंमें	**तत्**	= उस
एकम्	= एक	**ज्ञानम्**	= ज्ञानको (तो तूं)
अव्ययम्	= अविनाशी	**सात्त्विकम्**	= सात्त्विक
भावम्	= परमात्मभावको	**विद्धि**	= जान

राजस ज्ञानके लक्षण ।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥

पृथक्त्वेन, तु, यत्, ज्ञानम्, नानाभावान्, पृथग्विधान्,
वेत्ति, सर्वेषु, भूतेषु, तत्, ज्ञानम्, विद्धि, राजसम् ॥२१॥

तु	=और	नाना-भावान्	=अनेक भावोंको
यत्	=जो	पृथक्त्वेन	=न्यारा न्यारा करके
ज्ञानम्	=ज्ञान अर्थात् जिस ज्ञानके द्वारा मनुष्य	वेत्ति	=जानता है
		तत्	=उस
सर्वेषु	=संपूर्ण	ज्ञानम्	=ज्ञानको (तूं)
भूतेषु	=भूतोंमें	राजसम्	=राजस
पृथग्विधान्	=भिन्नभिन्नप्रकारके	विद्धि	=जान

तामस ज्ञानके लक्षण ।

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥२२॥

यत्, तु, कृत्स्नवत्, एकस्मिन्, कार्ये, सक्तम्, अहैतुकम्,
अतत्त्वार्थवत्, अल्पम्, च, तत्, तामसम्, उदाहृतम् ॥२२॥

तु	=और	कृत्स्नवत्	=संपूर्णताके सदृश
यत्	=जो ज्ञान		
एकस्मिन्	=एक	सक्तम्	=आसक्त है*
कार्ये	=कार्यरूप शरीरमें ही	च	=तथा (जो)
		अहैतुकम्	=बिना युक्तिवाला

* अर्थात् जिस विपरीत ज्ञानके द्वारा मनुष्य एक क्षणभंगुर नाशवान् शरीरको ही आत्मा मानकर उसमें सर्वस्वकी भांति आसक्त रहता है ।

अतत्त्वार्थ-वत्	= तत्त्व अर्थसे रहित (और)	तत्	= वह (ज्ञान)
अल्पम्	= तुच्छ है	तामसम्	= तामस
		उदाहृतम्	= कहा गया है

सात्त्विक कर्मके लक्षण ।

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥

नियतम्, सङ्गरहितम्, अरागद्वेषतः, कृतम्, अफलप्रेप्सुना, कर्म, यत्, तत्, सात्त्विकम्, उच्यते ॥२३॥

तथा हे अर्जुन–

यत्	= जो	अफल-प्रेप्सुना	= फलको न चाहनेवाले पुरुषद्वारा
कर्म	= कर्म	अराग-द्वेषतः	= बिना रागद्वेषसे
नियतम्	= शास्त्रविधिसे नियत किया हुआ (और)	कृतम्	= किया हुआ है
		तत्	= वह (कर्म तो)
सङ्ग-रहितम्	= कर्तापनके अभिमानसे रहित	सात्त्विकम्	= सात्त्विक
		उच्यते	= कहा जाता है

राजस कर्मके लक्षण ।

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥

यत्, तु, कामेप्सुना, कर्म, साहंकारेण, वा, पुनः, क्रियते, बहुलायासम्, तत्, राजसम्, उदाहृतम् ॥२४॥

तु	= और	पुनः	= तथा
यत्	= जो	कामेप्सुना	= फलको चाहनेवाले
कर्म	= कर्म		
बहुला-यासम्	= बहुत परिश्रमसे युक्त है	वा	= और

साहंकारेण	= { अहंकारयुक्त पुरुषद्वारा	**तत्**	= वह (कर्म)
		राजसम्	= राजस
क्रियते	= किया जाता है	**उदाहृतम्**	= कहा गया है

तामस कर्मके लक्षण ।

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥

अनुबन्धम्, क्षयम्, हिंसाम्, अनवेक्ष्य, च, पौरुषम्,
मोहात्, आरभ्यते, कर्म, यत्, तत्, तामसम्, उच्यते ॥२५॥

तथा–

यत्	= जो	**अनवेक्ष्य**	= न विचारकर
कर्म	= कर्म	**मोहात्**	= केवल अज्ञानसे
अनुबन्धम्	= परिणाम	**आरभ्यते**	= { आरम्भ किया जाता है
क्षयम्	= हानि		
हिंसाम्	= हिंसा	**तत्**	= वह कर्म
च	= और	**तामसम्**	= तामस
पौरुषम्	= सामर्थ्यको	**उच्यते**	= कहा जाता है

सात्त्विक कर्ताके लक्षण ।

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥

मुक्तसङ्गः, अनहंवादी, धृत्युत्साहसमन्वितः,
सिद्ध्यसिद्ध्योः, निर्विकारः, कर्ता, सात्त्विकः, उच्यते ॥२६॥

तथा हे अर्जुन ! जो कर्ता–

मुक्तसङ्गः	= आसक्तिसे रहित (और)	**धृत्युत्साह-समन्वितः**	= { धैर्य और उत्साह-से युक्त (एवं)
अनहंवादी	= { अहंकारके वचन न बोलनेवाला	**सिद्ध्य-सिद्ध्योः**	= { कार्यके सिद्ध होने और न होनेमें

निर्विकारः = हर्ष शोकादि विकारोंसे रहित है (वह)
कर्ता = कर्ता (तो)
सात्त्विकः = सात्त्विक
उच्यते = कहा जाता है

राजस कर्ताके लक्षण ।

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥

रागी, कर्मफलप्रेप्सुः, लुब्धः, हिंसात्मकः, अशुचिः,
हर्षशोकान्वितः, कर्ता, राजसः, परिकीर्तितः ॥२७॥

और जो–

रागी = आसक्तिसे युक्त
कर्मफलप्रेप्सुः = कर्मोंके फलको चाहनेवाला (और)
लुब्धः = लोभी है (तथा)
हिंसात्मकः = दूसरोंको कष्ट देनेके स्वभाववाला
अशुचिः = अशुद्धाचारी (और)
हर्षशोकान्वितः = हर्ष शोकसे लिपायमान है (वह)
कर्ता = कर्ता
राजसः = राजस
परिकीर्तितः = कहा गया है

तामस कर्ताके लक्षण ।

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥

अयुक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अलसः,
विषादी, दीर्घसूत्री, च, कर्ता, तामसः, उच्यते ॥२८॥

तथा जो–

अयुक्तः = विक्षेपयुक्त चित्तवाला
प्राकृतः = शिक्षासे रहित
स्तब्धः = घमण्डी
शठः = धूर्त (और)
नैष्कृतिकः = दूसरेकी आजीविकाका नाशक (एवं)

विषादी	= शोक करनेके स्वभाववाला	**दीर्घसूत्री**	= दीर्घसूत्री* है (वह)
अलसः	= आलसी	**कर्ता**	= कर्ता
च	= और	**तामसः**	= तामस
		उच्यते	= कहा जाता है

तीनों गुणोंके अनुसार बुद्धि और धृतिके भेदोंको सुननेके लिये भगवान् की आज्ञा ।

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥२९॥

बुद्धेः, भेदम्, धृतेः, च, एव, गुणतः, त्रिविधम्, शृणु,
प्रोच्यमानम्, अशेषेण, पृथक्त्वेन, धनंजय ॥२९॥

तथा–

धनंजय	= हे अर्जुन (तूं)	**भेदम्**	= भेद
बुद्धेः	= बुद्धिका	**अशेषेण**	= संपूर्णतासे
च	= और	**पृथक्त्वेन**	= विभागपूर्वक
धृतेः	= धारणशक्तिका	**(मया)**	= मेरेसे
एव	= भी	**प्रोच्यमानम्**	= कहा हुआ
गुणतः	= गुणोंके कारण	**शृणु**	= सुन
त्रिविधम्	= तीन प्रकारका		

सात्त्विकी बुद्धिके लक्षण ।

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥

प्रवृत्तिम्, च, निवृत्तिम्, च, कार्याकार्ये, भयाभये,
बन्धम्, मोक्षम्, च, या, वेत्ति, बुद्धिः, सा, पार्थ, सात्त्विकी ॥३०॥

पार्थ	= हे पार्थ	**प्रवृत्तिम्**	= प्रवृत्तिमार्ग†

* दीर्घसूत्री उसको कहा जाता है कि जो थोड़े कालमें होने लायक साधारण कार्यको भी फिर कर लेंगे ऐसी आशासे बहुत कालतक नहीं पूरा करता।

† गृहस्थमें रहते हुए फल और आसक्तिको त्यागकर भगवत् अर्पण बुद्धिसे केवल लोकशिक्षाके लिये राजा जनककी भांति बर्तनेका नाम प्रवृत्तिमार्ग है ।

च	= और	**बन्धम्**	= बन्धन
निवृत्तिम्	= निवृत्तिमार्गको*	**च**	= और
च	= तथा	**मोक्षम्**	= मोक्षको
कार्या-कार्ये	= कर्तव्य और अकर्तव्यको (एवं)	**या**	= जो बुद्धि
भयाभये	= भय और अभयको (तथा)	**वेत्ति**	= तत्त्वसे जानती है
		सा	= वह
		बुद्धिः	= बुद्धि (तो)
		सात्त्विकी	= सात्त्विकी है

राजसी बुद्धिके लक्षण ।

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥

यया, धर्मम्, अधर्मम्, च, कार्यम्, च, अकार्यम्, एव, च, अयथावत्, प्रजानाति, बुद्धिः, सा, पार्थ, राजसी ॥३१॥

और—

पार्थ	= हे पार्थ	**च**	= और
यया	= जिस बुद्धिके द्वारा (मनुष्य)	**अकार्यम्**	= अकर्तव्यको
धर्मम्	= धर्म	**एव**	= भी
च	= और	**अयथावत्**	= यथार्थ नहीं
अधर्मम्	= अधर्मको	**प्रजानाति**	= जानता है
च	= तथा	**सा**	= वह
कार्यम्	= कर्तव्य	**बुद्धिः**	= बुद्धि
		राजसी	= राजसी है

* देहाभिमानको त्यागकर केवल सच्चिदानन्दघन परमात्मामें एकीभावसे स्थित हुए श्रीशुकदेवजी और सनकादिकोंकी भांति संसारसे उपराम होकर विचरनेका नाम निवृत्तिमार्ग है ।

तामसी बुद्धिके लक्षण ।

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥

अधर्मम्, धर्मम्, इति, या, मन्यते, तमसा, आवृता,
सर्वार्थान्, विपरीतान्, च, बुद्धिः, सा, पार्थ, तामसी ॥३२॥

और

पार्थ	= हे अर्जुन	**च**	= तथा (और भी)
या	= जो	**सर्वार्थान्**	= संपूर्ण अर्थोंको
तमसा	= तमोगुणसे	**विपरीतान्**	= विपरीत ही
आवृता	= आवृत हुई बुद्धि	(**मन्यते**)	= मानती है
अधर्मम्	= अधर्मको	**सा**	= वह
धर्मम्	= धर्म	**बुद्धिः**	= बुद्धि
इति	= ऐसा	**तामसी**	= तामसी है
मन्यते	= मानती है		

सात्त्विकी धृति के लक्षण ।

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥

धृत्या, यया, धारयते, मनःप्राणेन्द्रियक्रियाः,
योगेन, अव्यभिचारिण्या, धृतिः, सा, पार्थ, सात्त्विकी ॥३३॥

और–

पार्थ	= हे पार्थ	**अव्यभिचारिण्या**	= अव्यभिचारिणी*
योगेन	= ध्यानयोगके द्वारा	**धृत्या**	= धारणासे (मनुष्य)
यया	= जिस		

* भगवत्-विषयके सिवाय अन्य सांसारिक विषयोंको धारण करना ही व्यभिचार दोष है उस दोषसे जो रहित है वह अव्यभिचारिणी धारणा है ।

मनः-प्राणेन्द्रिय-क्रियाः	= मन प्राण और इन्द्रियोंकी क्रियाओंको*	सा	= वह
		धृतिः	= धारणा (तो)
धारयते	= धारण करता है	सात्त्विकी	= सात्त्विकी है

राजसी धृतिके लक्षण ।

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥३४॥

यया, तु, धर्मकामार्थान्, धृत्या, धारयते, अर्जुन, प्रसङ्गेन, फलाकाङ्क्षी, धृतिः, सा, पार्थ, राजसी ॥३४॥

तु	= और	धृत्या	= धारणाके द्वारा
पार्थ	= हे पृथापुत्र	धर्म-कामार्थान्	= धर्म अर्थ और कामोंको
